## प्रावृट्शरत्कालदिवां जे। (१८/९७३)

प्रावृट् शरत् काल दिव् इत्येतेषां जे उत्तरपदे सप्तम्याः [1]अलुक् भवति। प्रावृषिजः। शरदिजः। कालेजः। दिविजः। पूर्वस्यैवा[2]यं प्रपञ्चः॥

## विभाषा वर्षक्षरशर[3]वरात्। (१६/९७४)

वर्ष क्षर शर वर इत्येतेभ्य उत्तरस्याः सप्तम्याः जे उत्तरपदे विभाषा अलुग् भवति। वर्षेजः, वर्षजः। क्षरेजः, क्षरजः। शरेजः, शरजः। [4]वरेजः, वरजः॥

## घकालतनेषु कालनाम्नः। (१७/९७५)

घसञ्ज्ञके प्रत्यये, कालशब्दे, तनप्रत्यये च परतः कालनाम्नः उत्तरस्याः सप्तम्या विभाषा अलुग् भवति। घ – पूर्वाह्णेतरे, पूर्वाह्णतरे। पूर्वाह्णेतमे, पूर्वाह्णतमे। काल – पूर्वाह्णेकाले, पूर्वाह्णकाले। तन – [5]पूर्वाह्णेतने, पूर्वाह्णतने। कालनाम्नः इति किम्? शुक्लतरे। शुक्लतमे। हलदन्तादित्येव, रात्रितरायाम्। उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नेष्यते [6]हृदयस्य हृल्लेख (६.३.५०/९८८) इति लेखग्रहणाल् लिङ्गात्। तेन घतनग्रहणे, तदन्तग्रहणं न भवति। काल इति न स्वरूपग्रहणम्[7]॥

## शयवासवासिष्वकालात्। (१८/९७६)

शय वास वासिन् इत्येतेषूत्तरपदेष्वकालवाचिनः उत्तरस्याः सप्तम्या विभाषा अलुक् भवति। खेशयः, खशयः। ग्रामेवासः, ग्रामवासः। ग्रामेवासी, ग्रामवासी। अकालात् इति किम्? पूर्वाह्णशयः[8]। हलदन्तात् इत्येव, भूमिशयः।

[७२१] अपो [9]योनियन्मतुषु सप्तम्या अलुग् वक्तव्यः।

अप्सुयोनिः। अप्सव्यः। [10]अप्सुमन्तौ। अप्सु भवः इति दिगादित्वाद् (४.३.५४/१४२९) यत् प्रत्ययः। [11]सर्वत्र सप्तमी इति योगविभागात् समासः॥

## नेन्सिद्धबध्नातिषु च। (१९/९७७)

इन्नन्ते उत्तरपदे सिद्धशब्दे बध्नातौ च परतः सप्तम्याः अलुग् न भवति। [12]स्थण्डिलवर्ती। सिद्ध – साङ्काश्यसिद्धः। [13]काम्पिल्यसिद्धः। [14]बध्नाति – [15]चक्रबद्धः। [16]चारबद्धः। सप्तमी इति योगविभागात् समासः। चक्रबन्धः इति केचिदुदाहरन्ति, तत् [17]पचाद्यजन्तं द्रष्टव्यम्। घञन्ते हि 'बन्धे च विभाषा' (६.३.१३/९७१) इत्युक्तम्॥

---

1. बहुलं इत्यधिकम् फ. 2. प्रपञ्चार्थमिदम् ब.फ.ह. 3. परात् ह. 4. परेजः परजः ह. 5. नास्ति फ. 6. वाक्यमिदं नास्ति फ. 7. नामग्रहणात् इत्यधिकम् फ. 8. अपराह्णशयः इत्यधिकम् ब.ह. 9. °मतिषु क. ड.ह. 10. अप्सुमतिः क.ड.फ. 11. सर्वत्र नास्ति ब, सर्वत्र योगविभागात् ह. 12. स्थण्डिलशायी ह. 13. उदाहरणमिदं नास्ति फ. 14. बध्नातौ फ. 15. चक्रबंधः क.ब.फ. 16. कारकबन्धः फ. 17. पचाद्यच् प्रत्ययान्तं ब.फ.